संस्कृतवार्ता:

31.08.2025

प्रात: - 06:55

<u>प्रधानमन्त्री/चीनयात्रा</u>

शङ्घाई-सहयोग-सङ्घटनस्य पञ्चविंशं शिखरसम्मेलनम् अद्यप्रभृति चीनदेशे आरभते। प्रधानमन्त्री नरेन्द्रमोदी द्विदिवसीय-सम्मेलने सहभागार्थं गतवासरे तियानजिन-नगरं प्राप्तवान्। श्रीमोदी तत्र विश्वनेतृभिः सह विमर्शं करिष्यति। शिखरसम्मेलने संघटनस्य पञ्चविंशति-वर्षाणाम् उपलब्धीनां समीक्षा भविष्यति, दशवर्षीय-कार्ययोजना च स्वीकृता भविष्यति। ध्यानास्पदम् अस्ति यत् चीनदेशः पञ्चमं वारं शङ्घाई-सहयोग-सङ्घटन-शिखरसम्मेलनम् आयोजयति। चीनदेशीयः राष्ट्रपतिः शी-जिन्पिङ्गः अस्य अध्यक्षतां करिष्यति। विंशतितोप्यधिकाः राष्ट्रप्रमुखाः, अन्ताराष्ट्रिय-सङ्घटनानां दश-नेतारः च अत्र सम्मेलने उपस्थिताः भविष्यन्ति इति संभाव्यते।

इतः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी ह्यः जापान-देशस्य द्विदिवसीयां यात्रां समापयत्। यात्रायाः प्रथमे दिने पञ्चदशे भारत-जापान-वार्षिक-सम्मेलने सहभागानन्तरं, प्रधानमन्त्री ह्यः टोक्यो-नगरे षोडश-राज्य-प्रान्तानां राज्यपालैः सह अमिलत्। प्रधानमन्त्री राज्यानां प्रान्तानां च सहयोगस्य सम्भावनायाः विषये प्रतिपादितवान् अपि च पञ्चदशे वार्षिकसम्मेलने प्रवर्तितस्य राज्य-प्रान्तीय-सहभागित्वोपक्रमस्य अन्तर्गतं सहभागित्व-प्रगतिम् उद्दिश्य कार्यार्थम् आग्रहम् अकरोत्। सः भारतस्य विकास-गाथायां भाग- ग्रहणाय राज्यपालान् आमन्त्रितवान्। एकस्मिन् सामाजिकान्तर्जालीय-पटले स्वीये सन्देशे प्रधानमन्त्री भारत-जापान-मैत्री आगामिषु कालेषु नूतनाम् उन्नतिं प्राप्नुयात् इति उक्त्वा एतत् हि सफल-भ्रमणं इति प्रत्यपादयत्।

## प्रधानमन्त्री/'मन की बात'-कार्यक्रमः

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रातःएकादश-वादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् पञ्चविंशत्यधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति । अयं हि आकाशवाणी-वार्ता

विभागस्य अन्तर्जाल पटले www.newsonair.com इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः

अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति । हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या क्षेत्रीयासु भाषासु अपि भविष्यति।

## संस्कृत-साप्ताहिकी

संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैकवादनतः भविष्यति।

## अश्विनी/टेम्पर्डग्लास्-निर्माणम्

सूचना-प्रविधिमन्त्री अश्विनी वैष्णवः ह्यः उत्तरप्रदेशस्य नोएडा-नगरे चलदूरभाषीययन्त्राणां कृते भारतस्य प्रथमं टेम्पर्ड्-ग्लास्-निर्माणसंयन्त्रम् उद्घाटितवान्। अस्मिन् अवसरे मन्त्री अवदत् यत् टेम्पर्ड्-ग्लास् इत्येतत् चल-दूरवाण्याः महत्त्वपूर्णम् उपसाधनम् अस्ति।

## ऋतुः

अद्य राजस्थाने, हिमाचलप्रदेशे उत्तराखण्डस्य विभिन्नेषु च क्षेत्रेषु मूसलाधार-वृष्टिः भविष्यति इति भारतीयर्तु-विज्ञान-विभागस्य अनुमानः अस्ति। जम्मूकश्मीर-पञ्जाब-हरियाणोत्तर-प्रदेशेषु स्थितिः यथावत् स्थास्यति इति अनुमीयते।

## लक्ष्यवेध-स्पर्धा

कजाकिस्तानस्य शिम्केन्ट्-नगरे आयोजिते षोडश्याम् एशिया-लक्ष्यवेध-स्पर्धा-मालिकायां पञ्चाशत् स्वर्ण-पदकानि विजित्य भारतेन ऐतिहासिकी उपलब्धिः अधिगता। भारतं सम्प्रति पदक-तालिकायां प्रथमं स्थानं भजते। भारतेन आहत्य नवनवतिः पदकानि जितानि। एतेषु पदकेषु षड्विंशतिः रजतपदकानि त्रयोविंशतिः च कांस्यपदकानि सन्ति। आतिथेयं कजाकिस्तानं पदकतालिकायां द्वितीयस्थानं प्राप्तवत्। चीनदेशेन तृतीयस्थानं प्राप्तम्।

।।इति वार्ता:।।